पूर्व्वं धान्याद्यासादनं गम्यते, गुरवे निवेदयेदिति, स्वल्पद्रव्यदाने आचार्य्यायैव अश्वं प्रदाय ऋत्विग्भ्यो यथाशक्ति सुवर्णादि दद्यात्। सहस्रपलादिद्रव्यदाने तु प्रकृतिवद्व्यवस्था, स्वल्पतरेष्वेकाग्निरत्नेऽपि द्रष्टव्या” हेमा० दा०

**हिरण्याश्वरथ** पु० हिरण्येन निर्म्मितः अश्वः तद्युक्तरथः। तुलादिषोड़शमहादानमध्ये दानार्थं स्वर्णादिना १कल्पिते सुवर्णमयाश्वयुक्तरथे २तद्दाने न०। तद्विधिर्यथा “अथातः संप्रवक्ष्यामि महादानमनुत्तमम्। हिरण्याश्वरथं नाम महापातकनाशनम्। पुण्यं दिनमथासाद्य कृत्वा ब्राह्मणवाचनम्। लोकेशावाहनं कुर्य्यात् तुलापुरुषदानवत्। ऋत्विग्मण्डपसम्भारभूषणाच्छादनादिकम्”। तुलापुरुषदानवदिति, मत्स्यपुराणोक्ततुलापुरुषदानवदेदितव्यम्, आदिशब्दस्यापि पूर्व्ववदेव व्याख्या “कृष्णाजिने तिलान् कृत्वा काञ्चनं कारयेद्रथम्। अष्टाश्वं चतुरश्वं वा चतुश्चक्रं सकूवरम्। इन्द्रनीलेन कुम्भेन ध्वजरूपेण संयुतम्। लोकपालाष्टकोपेतं पद्मरागदलान्वितम्”। अत्र तिलानां रथस्य च परिमाणापेक्षायां पुरुषेच्छया नियमः प्रकृतौ परिमाणाश्रवणात्, केचित्तु सन्निधानात् हेमहस्तिरथादिदानस्थितं तिलानां द्रोणपरिमाणत्वमिह वदन्ति। कूवरं युगाधारकाष्ठम्। ध्वजो दण्डः, स च रथस्य सौवर्णत्वात् सौवर्ण एव तथा चोपरिस्थितेन इन्द्रनीलमणिमयेन कलशेन युक्तः कर्त्तव्यः। लोका[illegible] यथोक्तं ब्रह्माण्डदाने, “चत्वारः पूर्णकलशा धान्यान्यष्टौ दशैव तु। कौशेयवस्त्रसंयुक्तमुपरिष्टाद्वितानकम्। माल्येक्षुफलसंयुक्तं पुरुषेण समन्वितम्। यो यद्भक्तः पुमान् कुर्य्यात् स तद्ब्राह्माधिवासनम्”। वितानमत्र पञ्चवर्णं, पुरुष इष्टदेवताकारः सौवर्णरथे स्थापनीयः। वस्त्रोपानहपादुकाश्च। “गोभिर्विभवतः सार्द्धं दद्याच्च शयनासनम्। आभारात्त्रिशतादूर्द्धं शक्तितः कारयेद्बुधः”। भारः पलसहस्रद्वयम्, एतच्च सुवर्णमानं ध्वजपुरुषलोकपालाश्वचक्ररक्षकसहितस्य वेदितव्यम्। “अष्टभीरथसंयुक्तं चतुर्भिरथ वाजिभिः। द्वाभ्यामथ युतं दद्याद्धेमसिंहध्वजान्वितम्”। हैमेन सिंहाङ्कितेन युक्तमिति अष्टाश्वपक्षे, चतुरश्वपक्षे च इन्द्रनीलमयकुम्भो ध्वजे कार्य्यः, अश्वद्वयपक्षे हेमसिंह इति व्यवस्था। “चक्ररक्षावुभौ तस्य तुरगस्यावथाश्विनौ। पुण्यं कालं ततः प्राप्य पूर्व्ववत् स्नापितो द्विजैः। शुक्लमाल्याम्बरो दद्यादिमं मन्त्रमुदीरयेत्”। हेमा० दा० मत्स्यपुराणीयम्।

**हिरुक्** अव्य० हि–बा० उकिक् रुट् च। १वर्जने २त्यागे मनो० २विनार्थे ३मध्यार्थे ४सामीप्ये च अमरः। ५अधमे शब्दच०

**हिल** हावकरणे तु० प० सक० सेट्। हिलति अहेलीत्।

**हिलमोचि(ची)** स्त्री हिल–क मुच–इन् कर्म० वा ङीप् (हेलेञ्चा) शाके शब्दर० स्वार्थे क तत्रैव शब्दच०। “शोथं कुष्ठं कफं पित्तं हरते हिलमोचिका” भावप्र०।

**हिल्ल** पुंस्त्री० हिल–लक्। मरालिखगे शब्दच०। स्त्रियां ङीष्।

**हिल्लोल** दोलने अद० चु० उभ० सक० सेट्। हिल्लोलयति ते अजिहिल्लोलत् त।

**हिल्लोल** पु० हिल्लोल–अच्। १तरङ्गे “हृदि कृत्वा स्त्रियः पादौ कराभ्यां धारयेत् करौ। यथेष्टं ताड़येद्योनिं बन्धो हिल्लोलसंज्ञकः” रतिम० उक्ते २रतिबन्धभेदे। घञ्। ३दोलने।

**हिल्वला** स्त्री इल्वला+पृषो०। मृगशिरानक्षत्रशिरोदेशस्थे पञ्चतारात्मके मृगव्याधे शब्दर०। [न्वीत्।

**हिव** प्रीणने भ्वा० प० सक० सेट् इदित्। हिन्वति अहि-

**हिवुक** न० हिवि–उकक् नि०। लग्नाच्चतुर्थे स्थाने ज्यो०।

**हिस** बधे वा चु० उ० पक्षे रुधा० प० सक० सेट् इदित्। हिनस्ति हिंसयति ते अहिंसीत् अजिहिंसत् त।

**ही** अव्य० हि–डी। १विस्मये अमरः। २दुःखे ३विषादे ४हेतौ मेदि०। ५शोके च शब्दर०।

**हीन** त्रि० पर० हा–क्त तस्य नः ईत्वम्। १ऊने २निन्द्ये अमरः। ३अधमे त्रि०। व्यवहारे ४प्रतिवादिभेदे पु० जटा० “अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः। आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः” नारदः।

**हीनवादिन्** पु० कर्म०। “पूर्व्ववादं परित्यज्य योऽन्यमालम्बते पुनः। वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः” स्मृत्युक्ते व्यवहारे १वादिभेदे। २मूके हेमच०।

**हीनाङ्ग** त्रि० हीनमङ्गं यस्य। स्वभावतो न्यूनाङ्गयुते “हीनाङ्गं विकलाङ्गञ्च” इति स्मृतिः। स्त्रियां वा ङीप् सा च। २क्षुद्रपिपीलिकायां हेमच०। [ताल) भरतः।

**हीन्ताल** पु० हीनस्तालो यस्मात् पृषो०। हिन्तालवृक्षे (हें-

**हीर** न० हृ–क नि०। १वज्रे २हीरके च। २शिवे ३सर्पे पु० हेमच० ४हारे ५सिंहे च पु० ६लक्ष्म्यां ७तैलाम्बुके स्त्री मेदि०। ८पिपीलिकायां हेमच० ९काश्मीर्य्याञ्च स्त्री राजनि० स्वार्थे क। हीरक (हीरा) मणिभेदे शब्दर०। वज्रशब्दे ८४४१ पृ० दृश्यम्।